# ॥ દેવી કેશાદિપાદવર્ણનમ્ ॥

.. devI keshAdipAdavarNanam ..

sanskritdocuments.org

August 20, 2017

# .. devI keshAdipAdavarNanam ..

# ॥ દેવી કેશાદિપાદવર્ણનમ્ ॥

## Sanskrit Document Information

Text title : devI keshAdipAdavarNanam

File name : devIkeshAdipAdavarNanam.itx

Category : devii

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Sunder Hattangadi sunderh at hotmail.com

Proofread by : Sunder Hattangadi, PSA Easwaran psaeaswaran at gmail.com, T B Lakshman Rao

Latest update : May 15, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

.. devI keshAdipAdavarNanam ..

# ॥ દેવી કેશાદિપાદવર્ણનમ્ ॥

## ॥ દેવી મુક્તિસ્થલષોડશસ્તોત્રમ્ ॥

સિન્દૂરારુણમુજ્જ્વલં નયનયોરાનન્દસન્દોહનં
વિશ્વંવ્યાપિમનોરમં કલયતાં સન્તાપવિધ્વંસનમ્ ।
તેજોમણ્ડલમાત્મનિ સ્ફુરતુ મે ભૂયસ્તદન્તર્ગતં
લાવણ્યાયતનં સ્વરૂપમપિ તે મુક્તિસ્થલસ્થે શિવે ॥ ૧॥

ઉદ્યદ્ભાસ્કરકોટિસુપ્રભમનર્ઘાનેકરત્નાવલી-
રાજચ્ચન્દ્રકલાવિરાજિમુકુટં હૈમં નિસર્ગોજ્જ્વલમ્ ।
આનીલં પૃથુકુઞ્ચિતાગ્રમમલં કલ્પપ્રસૂનાઞ્ચિતં
સ્નિગ્ધં તે કબરીભરં ચ કલયે મુક્તિસ્થલસ્થે શિવે ॥ ૨॥

અર્ધેન્દુપ્રતિમે લલાટફલકે નીલાલકાલઙ્કૃતે
કસ્તૂરીતિલકં વિલાસચતુરં ચાનઙ્ગચાપોપમમ્ ।
ભ્રૂવલ્લીયુગલં સમુન્નતમતિસ્વચ્છં ચ નાસાપુટં
રાજન્મૌક્તિકરત્નમમ્બ કલયે મુક્તિસ્થલસ્થે શિવે ॥ ૩॥

લીલાચઞ્ચલમઞ્જનાઞ્ચિતમતીતાલોકલીલાલવ-
પ્રધ્વસ્તાનતભૂરિતાપનિકરં વિસ્તીર્ણમત્યાયતમ્ ।
સ્નિગ્ધશ્યામલપક્ષ્મપઙ્ક્તિનયનદ્વન્દ્વં દયાવારિધે
દીને પાતય મય્યનન્યશરણે મુક્તિસ્થલસ્થે શિવે ॥ ૪॥

ગણ્ડૌ વિદ્રુમદર્પણાતિવિમલૌ ગોરોચનાલઙ્કૃતૌ
કર્ણોદ્ભાસિતરત્નકુણ્ડલરુચા વિભ્રાજિતૌ કોમલૌ ।
બન્ધૂકપ્રસવારુણાધરપુટં કુન્દાભદન્તાવલી-
બિભ્રાજચ્ચિબુકં ચ દેવિ કલયે મુક્તિસ્થલસ્થે શિવે ॥ ૫॥

ભાસ્વદ્રત્નકિરીટકુણ્ડલયુગગ્રૈવેયકોદ્ભાસિતે

વક્ત્રેન્દૌ નિજકાન્તિરૂષિતપરિષ્કારે મનોનન્દને ।
રાજન્તીં સ્મિતચન્દ્રિકાં નતજનાન્તસ્તાપનિર્મૂલિનીં
નિત્યં ચેતસિ ભાવયામિ વરદે મુક્તિસ્થલસ્થે શિવે ॥ ૬॥

કસ્તૂરીઘનસારકુઙ્કુમમુખૈરાલેપનૈરઞ્ચિતં
ગ્રૈવેયૈશ્ચ નિરન્તરં મણિમયૈર્માઙ્ગલ્યસૂત્રોજ્જ્વલમ્ ।
રેખાભિસ્તિસૃભિસ્તથા વિલસિતં ચારુસ્વરં બન્ધુરં
કણ્ઠં તે કલયામિ ગીતિનિપુણે મુક્તિસ્થલસ્થે શિવે ॥ ૭॥

કેયૂરાદિવિચિત્રભૂષણતરાન્ રત્નાઙ્ગુલીયપ્રભા-
રાજત્પાણિતલાન્ ધૃતૈક્ષવધનુઃપુષ્પેષુ પાશાઙ્કુશાન્ ।
આનમ્રાભયદાન્ શિરીષમૃદુલાનાલેપનૈરઞ્ચિતાન્
બાહૂન્ મૂર્ધનિ મે નિધેહિ સદયં મુક્તિસ્થલસ્થે શિવે ॥ ૮॥

નિષ્કં બાહુલતાન્તરે મણિગણૈરાકીર્ણમત્યદ્ભુતં
હારં ચાપિ મનોહરં મણિમયીં માલાં તથા કાઞ્ચનીમ્ ।
રાજીવોત્પલચમ્પકાદિકુસુમૈઃ ક્લૃપ્તામહીનશ્રિયં
માલાં સૌરભશાલિનીં ચ કલયે મુક્તિસ્થલસ્થે શિવે ॥ ૯॥

વૃત્તૌ કુઙ્કુમરૂષિતૌ નિરુપમૌ પીનૌ સ્તનૌ સંહતૌ
તુઙ્ગૌ કોમલસૂક્ષ્મપાટલપટપ્રચ્છાદિતાવુજ્જ્વલૌ ।
મધ્યં ચાપિ કૃશં વલિત્રયયુતં વક્ષોજભારાનતં
તન્વીં રોમલતાં ચ દેવિ કલયે મુક્તિસ્થલસ્થે શિવે ॥ ૧૦॥

આવર્તોપમમન્દશોભમમલં નિમ્નં ચ નાભીબિલં
કાઞ્ચીદામનિબદ્ધરત્નવિલસત્સિન્દૂરવર્ણાંશુકમ્ ।
વિસ્તીર્ણં રશનાપદં કનકસદ્રમ્ભાનિભૌ કોમલૌ
ઊરૂ ચારુતરૌ ચ દેવિ કલયે મુક્તિસ્થલસ્થે શિવે ॥ ૧૧॥

જાનુદ્વન્દ્વમિભેન્દ્રકુમ્ભસુષમાચોરં ચ જઙ્ઘાયુગં
ચેતોજન્મનિષઙ્ગસૌરભહરં વૃત્તં ચ નાત્યાયતમ્ ।
મઞ્જીરં ચ મનોઽભિરામનિનદં રત્નપ્રભાભાસુરં
કૂર્માભં પ્રપદં ચ દેવિ કલયે મુક્તિસ્થલસ્થે શિવે ॥ ૧૨॥

સ્નિગ્ધસ્વચ્છતરાઙ્ગુલીદલતતિચ્છાયં વિરાજન્નખ-
પ્રાલેયાંશુમરીચિધૂતવિનમત્તાપાન્ધકારોત્કરમ્ ।

કાન્તં કલ્પલતાપ્રવાલસુભગં લાક્ષારસારઞ્જિતં
પાદાબ્જં તવ ભાવયામિ વરદે મુક્તિસ્થલસ્થે શિવે ॥ ૧૩॥

ભક્તાનાં હૃદયેષુ ભૂરિકૃપયા ન્યસ્તં તદન્તર્ગતં
ગાઢં તાપતમો નિરસ્ય શિશિરીકુર્વન્પ્રકાશાધિકમ્ ।
આનન્દામૃતવર્ષિકં ચ વરદં યત્સેવ્યમાનં બુધૈ-
સ્તત્તે પાદસરોજમમ્બ કલયે મુક્તિસ્થલસ્થે શિવે ॥ ૧૪॥

યત્પાંસું કમલાસનપ્રભૃતયો દેવા મુનીન્દ્રાસ્તથા
વોઢું મૂર્ધ્નિ ન કુર્વતે યતધિયઃ કિં કિં તપો દુષ્કરમ્ ।
તત્પાદામ્બુજમાનતસ્ય સતતં દીનસ્ય મે મસ્તકે
કૂજન્નૂપુરમર્પયામ્બ સદયં મુક્તિસ્થલસ્થે શિવે ॥ ૧૫॥

રાજા ચૈત્રકુલોદ્ભવસ્ય સુરથો યત્સેવયાઽભૂન્મનુઃ
વૈશ્યઃ સોઽપિ સમાધિરાપ મતિમાન્ જ્ઞાનં પરૈર્દુર્લભમ્ ।
યોષામૂર્તિરમૂમુહત્સ્મરરિપું દેવોઽપિ નારાયણ-
સ્તત્તે પાદસરોજમમ્બ કલયે મુક્તિસ્થલસ્થે શિવે ॥ ૧૬॥

નિત્યં યેન શિવાઙ્ગવર્ણનમિદં સ્તોત્રં દ્વયોસ્સન્ધ્યયોઃ
પદ્યૈઃ ષોડશભિઃ કૃતં કૃતધિયા મર્ત્યેન સઙ્કીર્ત્યતે ।
તસ્ય પ્રીતમનાઃ પરેશમહિષી ત્વં દેવિ તાપત્રયં
નિર્ધૂયાશુ વિધેહિ ભક્તિમચલાં મુક્તિસ્થલસ્થે શિવે ॥ ૧૭॥

પ્રાગન્તેવસતા ચિરં શ્રુતિગિરસ્સારાવદાતાત્મના
નેયત્તા નિરણાયિ યસ્ય ભગવચ્છ્રીશઙ્કરસ્વામિના ।
બ્રાહ્મં વૈષ્ણવમૈશ્વરં ચ કિમપિ પ્રાગલ્ભ્યમુદ્ભાસયત્
સાયુજ્યં મમ સન્દધાતુ તદિદં મુક્તિસ્થલસ્થં મહઃ ॥ ૧૮॥

ૐ તત્સત્ ।

॥ ઇતિ શ્રીનારાયણભટ્ટતિરિવિરચિતં મુક્તિસ્થલષોડશસ્તોત્રં સમ્પૂર્ણમ્ ॥

The varNanam is attributed to Melpathur Narayana Bhattathiri, the composer of the Narayaneeyam.

The last shloka (18) is generally considered part of this mukthisthala Shodasha stotra. Legend is that Shrimad Shankaracharya worshipped here and realized the greatness of the presiding Deity.

Encoded by Sunder Hattangadi sunderh at hotmail.com
Proofread by Sunder Hattangadi, PSA Easwaran, T B Lakshman Rao

.. devI keshAdipAdavarNanam ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*